# Shri Nrisimhamangalanavaratnamalikakhyam

# શ્રીનૃસિંહમઙ્ગલનવરત્નમાલિકાખ્યમ્

## Document Information

Text title : Shri Nrisimhamangalanavaratnamalikakhyam

File name : nRRisiMhamangalanavaratnamAlikAkhyam.itx

Category : vishhnu, dashAvatAra, mangala, nava, viShNu

Location : doc_vishhnu

Author : Jaggu. Venkatarya

Proofread by : M K Barman

Description/comments : nRRisiMhakosha 2 upAsanA khaNDa

Latest update : August 4, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 4, 2025

*sanskritdocuments.org*

# શ્રીનૃસિંહમઙ્ગલનવરત્નમાલિકાખ્યમ્

(કીર્તિશેષ સાઙ્ખ્યતીર્થ શ્રી. જગ્ગૂ. વેઙ્કુટાર્યરચિતમ્)

ૐ મઙ્ગલં સ્તમ્ભડિમ્ભાય મઙ્ગલં મૃત્યુમૃત્યવે ।
મઙ્ગલં રૌદ્રરૂપાય નરસિંહાય મઙ્ગલમ્ ॥ ૧॥

હિરણ્યકશિપું હત્વા દૈત્યેન્દ્રં દેવકણ્ટકમ્ ।
જગદ્રક્ષણધુર્યાય જગદ્બીજાય મઙ્ગલમ્ ॥ ૨॥

પ્રહ્લાદસ્તુતિસન્તુષ્ટપ્રસન્નનિજમૂર્તયે ।
વરદાઽભયહસ્તાય વરદાય ચ મઙ્ગલમ્ ॥ ૩॥

ખરાગ્રૈર્વજસંસ્પર્શૈર્નખરૈઃ શત્રુદારિણે ।
તીક્ષ્ણદંષ્ટ્રાય તત્ત્વાયર્તાક્ષ્ય વાહાય મઙ્ગલમ્ ॥ ૪॥

નરકણ્ઠીરવાઽઽકાર વ્યક્તાત્યુગ્રવિભૂતયે ।
મૃગેન્દ્રાય નરેન્દ્રાય દૈવતેન્દ્રાય મઙ્ગલમ્ ॥ ૫॥

કિરીટહારકેયૂરકુણ્ડલાલઙ્કુતાય ચ ।
કોટિસૂર્યપ્રકાશાય દેવસિંહાય મઙ્ગલમ્ ॥ ૬॥

ત્રિયુગાય ત્રિપૃષ્ઠાય ત્રિગુણાય ત્રિમૂર્તયે ।
નરકેસરિરૂપાય લક્ષ્મીલોલાય મઙ્ગલમ્ ॥ ૭॥

મત્સ્યકચ્છપવારાહરામવામનમૂર્તયે ।
રામકૃષ્ણાત્મને બૌદ્ધકલ્કિસિંહાય મઙ્ગલમ્ ॥ ૮॥

સર્વબીજાય સત્યાય સર્વાધિષ્ઠાનમૂર્તયે ।
સર્વેશ્વરાય સર્વસ્મૈ સત્યસિંહાય મઙ્ગલમ્ ॥ ૯॥

મઙ્ગલાઽઽશાસનપરૈર્મદાઽઽચાર્ય પુરોગમૈઃ ।
સર્વૈશ્ચ પૂર્વૈરાચાર્યૈઃ સત્કૃતાયાસ્તુ મઙ્ગલમ્ ॥ ૧૦॥

ઇતિ જગ્ગૂ. વેઙ્કુટાર્યરચિતં શ્રીનૃસિંહમઙ્ગલનવરત્નમાલિકાખ્યં સમ્પૂર્ણમ્ ।

Proofread by M K Barman

*Shri Nrisimhamangalanavaratnamalikakhyam*

pdf was typeset on August 4, 2025

Please send corrections to *sanskrit@cheerful.com*